Kāṇḍa 5; complete.

Begins: ईशानस्सर्वविद्यानां० ।
अतः परमग्निकाण्डमग्र्यार्षेयमारभ्यते ।

176. 23. L. 14.

Palm-leaf. 152 folia. 16$\frac{4}{10}$″ × 1$\frac{4}{10}$″. 6—8 lines. Grantha script. Wooden board at either end. Fairly old. Worm-eaten. In the same hand as the last one. Inked. Unaccented.

Kāṇḍas 6 and 7; complete except Anuvākas 19—25 of the last Prasna of the latter Kāṇḍa.

177. 29. K. 29.

THE TAITTIRĪYASAṂHITĀBHĀṢYA (VEDĀRTHAPRAKĀS'A) OF SĀYAṆA

तैत्तिरीयसंहिताभाष्यम् (वेदार्थप्रकाशः)-सायणकृतम्

Palm-leaf. 38 folia. 16½″ × 1¼″. 6 lines in a page. Telugu script. Fairly recent. In pretty good order. Good medium hand. Uninked.

5th and 7th Prasnas of the 4th Kāṇḍa; complete.

Attributed by a marginal note in Telugu on the obverse of the 1st folio, to Vidyāraṇya.

Colophon: इति श्रीमद्दिव्ययोगींद्रश्रीविद्यार्थमहेश्वरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवरभुक्तमहाराजस्याज्ञापरिमाधविव्ये वेदार्थप्रकाशे यजुस्संहितायां चतुर्थकांडे सप्तमप्रपाठके पंचदशानुवाकः ॥

The original leaf-marks 1—38 are scored off by a later hand which has instead 302 etc.

178. 30. H. 2.

Palm-leaf. 135 folia (marked 135—269). 18¾″ × 1¼″. 10 lines in a page. Grantha script. Wooden board at either end. Old. A little worm-eaten, but otherwise in good order. Good medium writing. Inked.

Kāṇḍa 2; complete.

A comparison with the text of the Ānandāsrama edition shows some variant readings.

Colophon: इति वेदार्थप्रकाशे यजुस्संहितायां द्वितीय्यकाण्डे षष्ठप्रपाठके द्वादशोनुवाकः । समाप्तश्च द्वितीयकाण्डः ।

179. 30. H. 31.

Palm-leaf. 39 folia. 16½″ × 1¼″. Grantha script. Fairly old. Injured. Good small writing. Inked.

The 6th Prasna of the 4th Kāṇḍa, breaking off in the 6th Pañcāsat of its 9th Anuvāka.

180. 29. K. 27.

Palm-leaf. 77 folia. 15¼″ × 1½″. 9 lines in a page. Grantha script. Old. Worm-eaten. Fair small writing. Uninked.

From the end of the 4th Anuvāka of the 2nd Praśna of the 4th Kāṇḍa to the end of its 3rd Praśna.

181. 21. J. 45.

Palm-leaf. 135 folia. 16″ × 1½″. 6 lines in a page. Grantha script. Old, brittle and damaged. 8 leaves missing. Good medium writing. Uninked.

Kāṇḍa 3; incomplete, breaking off in the 1st Pañcāśat of the 5th Anuvāka of the 5th Praśna.

Colophon: इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे यजुस्संहितायां० ॥

182. 9. H. 5.

Paper. 69 folia. 15¼″ × 5″. 13 lines in a page. Telugu script. Bound in book form. Fairly recent. In excellent condition. Good small writing.

Breaks off in the beginning of the 12th Anuvāka of the first Praśna of the 1st Kāṇḍa.

A comparison with the Ānandāśrama edition shows some variant readings. Begins with वागीशाद्याः सुमनसः etc. and not with गजवदनमचिन्त्यं etc.

A label on the obverse of the 1st folio says that this was presented to the Library by Pandit N. Bashyacharya.

183. 34. F. 21.

Palm-leaf. 142 folia. 16″ × 1½″. 10 lines in a page. Telugu script. Wooden board at either end. Fairly old. Badly damaged. Good small writing. Uninked.

Kāṇḍa 2; complete.

A note at the end says that the transcription was completed on the 10th of the bright fortnight of Mārgaśīrṣa of Bhāva.

184. 21. J. 35.

Palm-leaf. 140 folia. 16½″ × 1¼″. 13 lines in a page. Telugu script. Very old and brittle; slightly worm-eaten; a few leaves broken. Fair minute hand. Uninked except a few leaves.

Kāṇḍa 1; incomplete, breaking off in the 22nd Anuvāka of the 8th Praśna; foll. 21—53 and 59—104 are missing; and the commentary from the middle of the 3rd Anuvāka to the middle of the 13th Anuvāka of the 1st Praśna, and from the middle of the 14th Anuvāka of the 1st Praśna to the end of the 11th Anuvāka of the 3rd Praśna is lost.

185. 29. K. 19.

Palm-leaf. 81 folia. 16¼″ × 1¼″. 6 lines in a page. Telugu script. Fairly recent. In good order. Fair medium hand. Uninked.

Kāṇḍa 5; complete except the last few (Viniyogasaṃgraha) Kārikās.

186. 29. C. 37.

Palm-leaf. 121 folia. 16½″ × 1½″. 10 lines in a page. Grantha script. Wooden board at either end. Fairly recent. Slightly worm-eaten. Legible small writing. Uninked.

Kāṇḍa 4; complete.

Colophon: इति श्रीमद्वित्र्ययोगीन्द्रविद्यातीर्थ-महेश्वरापरावतारस्य श्रीमद्राजाधिराजराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याज्ञापरिपालकेन सायणाचार्येण विरचिते माधवीये वेदार्थ . . शे यजुस्संहितायां चतुर्थकाण्डे सप्तमप्रपाठके पञ्चदशोनुवाकः। समाप्तश्च प्रपाठकः। समाप्तश्च चतुर्थकाण्डम्॥ हरिः ओं॥

187. 23. L. 12.

Palm-leaf. 107 folia (numbered 103 sq.) 17″ × 1½″. 10 lines in a page. Grantha script. Old, fragile, worm-eaten and damaged. Fair medium writing. Inked.

Kāṇḍa 3; incomplete, breaking off in the 9th Anuvāka of the 5th Praśna.

The Anuvāka colophon sometimes ends with रघुनाथाय नमः followed sometimes by महागणपतये नमः and once by हनूमते नमः, all the three Namaskāras being written in Telugu.

188. 20. C. 32.

RUDRAPRAŚNABHĀṢYA (JÑĀNAYAJÑA) OF KAUŚIKA BHAṬṬABHĀSKARA

रुद्रप्रश्नभाष्यम् (ज्ञानयज्ञः)—कौशिकभट्टभास्कर-कृतम्

Palm-leaf. 52 folia. 15¾″ × 1¼″. 7 lines in a page. Telugu script. Wooden board at either end. Slightly injured. Fairly well written in a medium hand. Uninked.

Complete.

In the colophon at the end the author is surnamed Kāśikā, evidently an error for his patronym Kauśika.

Begins: . . . अविघ्नमस्तु। . . . . अग्नि-कांडमध्या . य . . . . । तत्र . . . याभ्यामिष्टकायां शतरुद्रिय्यं जुहोति। नमस्ते रुद्र मन्यव इति। रुद्रो वा एष यदग्निः। तस्यैते तनुवाविद्यादि। अजक्षीरिण जुहोति। यद्ग्राम्याणां पशूनां पयसा जुहुयादित्यादि ब्राह्मणं। अर्कपर्णेन . . . . . हारानयेति स यत्र धारेष्टकां प्राप्नोति तत्प्रतिपद्य तेन अंगिरसः सुवर्गं लोकं यंतो अजायां इत्यादि ब्राह्मणं। तत्रायं प्रयोगक्रमः। अथैतस्या-र्कपर्ण . . . . . स्रावणं कृत्वा उदङ्मुखस्तिष्ठन् मुखदघ्ने धारयन् नमस्ते रुद्र मन्यव इत्याद्यनुवाकं निगद्य द्वितिय्यं त्रितिय्यं चथुर्थस्यानुवाकस्य यत्राभिजानाति नमः क्षतृ . . . तत्स्वाहाकरोति।

Colophon to Anuvāka 1 (fol. 13*b*): इति श्रीभट्टभास्करमिश्रविरचिते यजुर्वेदभाष्ये श्रीरुद्रप्रश्ने प्रथ-मोनुवाकः।

Ends: कापिलेन पयसा अयुतं जुहुयात्। जाति-स्मरो जायते।

Colophon: इति काशिकाभट्टभास्करविरचिते यजुर्वेदभाष्ये ज्ञानयज्ञाख्ये अग्निकांडे पंचमप्रपाठके श्रीरुद्रप्रश्ने एकादशोनुवाकः। समाप्तः प्रश्नः। श्रीसदा-शिवाय नमः।

शतरुद्रप्रभावेन सर्वमेव यथा तथा।
एकादशैकादशतो दानमुक्तं मयानघ॥
सर्वभागकरो होमः कलशस्थापनं तथा।
शिखास्फुटितसंस्कारमपि निर्वाणकारकं॥

रुद्रैकादशपूजा च सोमापो सुखसंज्ञिता ।
जातिस्मृतिक्रिया पुंसां पूजा दानं तथैव च ॥
राज्ञामन्यच्च तत्कल्यं सर्वमुक्तमशेषतः ।
श्रीसांबसदाशिवार्पणमस्तु ॥

For this see the Descriptive Catalogue, Government Oriental Manuscripts Library, Madras, Nos. 134, 135 and 137; Eggeling, India Office Catalogue, No. 153; Ānandāśrama ed., 1888.

Contains some variants to the Ānandāśrama edition.

Two extra leaves at the end. One contains the first few lines of Appaya's Madhvamatavidhvaṃsana, a commentary on his Madhvatantramukhamardana. The other, a small broken one, $5\frac{1}{2}'' \times \frac{3}{4}''$, has on its obverse : श्री . परमहंसपरिव्राजकाचार्यवर्य-पदवाक्यप्रम ..... श्रुतपश्चक्रवर्ति अनाद्य-विछिन्नगुरुपरंप ... पाव षड्दर्शन ..... य वैदुकमार्गप्रवर्तकसर्वतंत्रस्वत .... भेदानि विदा .....।

On the reverse : चिरवासरुय्यश्रुंगपुरवराधीश्वर श्रुंगेरि .. रूपाक्षश्रीविद्या ..... न्महाजनमुलकु यथोचितसन्मानपूर्व ..... विरचिसं .....।

189. 29. K. 22.

THE RUDRAPRAS'NABHAṢYA (JÑĀNAYAJÑA) OF KAUS'IKA BHAṬṬABHĀSKARA

रुद्रप्रश्नभाष्यम् (ज्ञानयज्ञः)—कौशिकभट्टभास्करकृतम्

Palm-leaf. 54 folia (foll. 111 sq.). $17\frac{1}{2}'' \times 1\frac{1}{2}''$. 6 or 7 lines in a page. Telugu script. Fairly old. Slightly worm-eaten. Good medium writing. Uninked.

Complete.

Begins :

अर्धनारीश्वरं वंदे क्षुत्पिपासाप्रशांतये ।
व्याधिनाशाय सततं सर्वपापक्षयाय च ॥

अतः परमग्निकाण्डमेव व्याख्येयं । तत्र चरमायामिष्टकायां जुहोति शतरुद्रीयं जुहोति । नमस्ते रुद्र मन्यव इति ।

Ends : कापिलेन पयसाष्टशतं जुहुयात् । जातिस्मरो भवेत् । ध्यानं पूर्ववत् ॥ ओं शान्ति शांति शांतिः ॥

Colophon : इति श्रीभट्टभास्करविरचिते यजुर्वेदभाष्ये अग्निकांडे पंचमप्रपाठके ज्ञानयज्ञाख्ये रुद्रप्रश्ने एकादशोनुवाकस्समाप्तः ॥ ओं शान्तिश्शांतिश्शांतिः । हरिः ओं श्रीसांबशिवार्पणमस्तु ॥ यादृशं० ॥

190. 22. R. 6.

THE RUDRAPRAS'NABHĀṢYA OF BHAṬṬABHĀSKARA

रुद्रप्रश्नभाष्यम्—भट्टभास्करकृतम्

Palm-leaf (S'rītāla). 21 folia. $9\frac{4}{10}'' \times 1\frac{1}{2}''$. 9—10 lines in a page. Grantha script. Wooden board at either end. Fairly old. Slightly worm-eaten. Good medium writing. Inked.

Complete.

Ascribed to Bhaṭṭabhāskara in the colophon, but except some slight variations, same as the one ascribed to Vidyāraṇya in the MSS. noticed hereunder and under No. 140 in the Descriptive Catalogue, Government Oriental MSS.

Library, Madras. Looks like an adaptation of the commentary of Kausika Bhaṭṭabhāskara.

Begins :

अतः परमग्निकाण्डमेव अग्न्याधेयं। तत्र चरमायामिष्टकायां शतरुद्रीयं जुहोति। नमस्ते रुद्रमन्य इति। रुद्रो वा एष यदग्निः तस्यैते तनुवौ इत्यादि। अस्य रुद्रसमुदायस्य ऋषिरग्निमार्ताण्डः। महाविराट् छंदः। शंभुर्देवता। शातातपः—

स्तेयं कृत्वा सुरां पीत्वा ब्रह्महत्यां
च कृत्वा गुरुदारांश्च गत्वा।
भस्मच्छन्नो भस्मशय्याशयानो
रुद्राध्यायी मुच्यते सर्वपापैः॥

याज्ञवल्क्यः—

सुरापी स्वर्णहारी च रुद्रजापी जले स्थितः।
सहस्रशीर्षजापी च मुच्यते सर्वकिल्बिषैः॥
वेदमेकगुणं जप्त्वा तथाह्वैव विशुद्ध्यति।
रुद्रैकादशिनीं जप्त्वा तत्क्षणादेव शुद्ध्यति॥
रोगवान् पापवांश्चैव रौद्रां जप्त्वा जले स्थितः।
रोगवान् पापाद्विनिर्मुक्तो महतीं श्रियमश्नुते॥

आहतुरत्र्यंगिरसौ—:

एकादशगुणान्वापि रौद्रानावृत्य धर्मवित्।
महापापैरपि स्पृष्टो मुच्यते नात्र संशयः॥

वायव्यपुराणे—:

यश्च रौद्रं जपेनित्यं ध्यायमानो महेश्वरं।
यश्च सागरपर्यन्तां सशैलवनकाननां॥
सर्वरत्नगुणोपेतां सवृक्षजलशोभितां।
विप्राय दद्याद्वसुधां चामीकरतरुज्वलां॥
तस्मादप्यधिकं तस्य सकृद्रुद्रजपाद्भवेत्।
मम भावं समुत्सृज्य यश्च रौद्रान् जपेत्सदा॥
स तेनैव च देहेन रुद्रस्संजायते ध्रुवं।
चमकं नमकं चैव पुरुषसूक्तं तथैव च॥
नित्यं त्रयं प्रयुंजानो ब्रह्मलोके महीयते।
चमकं नमकं चैव जपंतं पुरुषं सदा॥
प्रविशेत्स महादेवो गृहं गृहपतिर्यथा।

रोगवान्मन्यतोदङ् परेत्य रुद्रां जपंश्चरेदित्य . यज्ञसंयुक्तः कल्प इति। शतं रुद्राः देवता अस्येति शतरुद्रीयमित्युच्यते। अनया च रुद्रोपनिषदा ब्रह्मविद्या प्रतिपाद्यते। ब्रह्मणश्च त्रीणि रूपाणि संति। एकं कार्यरूपं। इतरत् पुरुषाख्यं। सृष्टिस्थितिसंहारकर्तृत्वनिमित्तरूपमन्यत्।

मूर्त्यष्टकमधिष्ठाय बिभर्तीदं चराचरं।
आत्मत्रयमधिष्ठाय सृष्ट्यादि च करोति सः॥

अस्य देवस्य तन्वौ द्वौ घोरान्या शिवान्येति। शक्तिः सर्वदा तस्य सहकारिणी। तस्य संहारकर्तृप्रभृतयो देवेभ्यः घोरास्तनवः। तासु भयशंका। तस्मात्प्रथमेनानुवाकेन तादृशं देवं तस्योपसंहारकारिणं नम इत्यादिभिर्नमस्कृत्य प्रसादयति। यैवास्य घोरा तनूस्तांतेन शमयतीति। ततस्तान्युपसंहार्य द्वितीयप्रभृतिभिरष्टाभिरनुवाकैर्वैश्वरूप्येण स्तुतिनमस्कारौ करोति। एवं हि देवः सुतरां प्रसीदतीति। ततो दशमैकादशाभ्यामभयं याचते। अयं महावाक्यार्थः। प्रथमेनानुवाकेन क्रुद्धं देवं प्रसाद्य ततोष्टाभिरनुवाकैः किमधिष्ठानमधिष्ठाय देवस्तिष्ठतीत्यजानन् वेदपुरुषः सर्वं चराचरं तदधिष्ठानशंकया नमस्कृत्य अंत्याभ्यामभयं याचते। प्रा . . . ति किंचिद्रूपमधिष्ठाय निग्रहानुग्रहौ कर्तुमेवास्य लीलया स्थितमिदं विश्वं वश्यं वर्तते। अस्य पुरश्चरणादि द्वादशरात्रं कृच्छ्रं चरित्वा तत एकादशसहस्रमभिमतदिनानि . . रतं जपेत्। अनेन प्रदक्षिणनमस्कारौ दक्षिणामूर्तिसंनिधौ चरि . व्रत एका-

दश सहस्रजपादशेषं पापं नाशयति तस्मिन्नेव दक्षिणामूर्तिसंनिधौ स्वाग्निं निधाय घृतपायसं श्रपयित्वा सहस्रं जुहुयात्। साक्षाद्देवं पश्यति। तस्मिन्नेव सर्वतोरत्निमात्रं कुण्डमात्रं कल्पयित्वा कापिलेन घृतेन स्वाग्नौ शतसहस्रं जुहुयात्। गाणापत्यं लभते। अनेन च राजा पुरश्चरणसिद्धेन ब्राह्मणेन पूजां कारयेत्। लिंगस्य दक्षिणे कुण्डं पूर्ववत् कल्पयित्वा कापिलेन स्वाग्नौ स्वाग्निमाधायाज्यदूर्वातण्डुलशमीसमिद्भिः प्रत्येकमष्टसहस्रं जुहुयात्। देवस्य संनिधावष्टसहस्रं जपेत्। आलयमभितः प्रदक्षिणमष्टसहस्रं कृत्वा . . वत्प्रमाणं च कुर्यात्। एतैः प्रसंनो भगवान् भवति। नमस्ते रुद्रमन्यव इति। अनुष्टप् छंदः। कश्यप ऋषिः। रुद्रो देवता। हे रुद्र तव नमः। स्वात्मभूताय मन्यवे क्रोधाय अस्त्विति वक्ष्यमाणमन्त्राप्यनुषज्यते। रोदयति सर्वमंत्यकाल इति रुद्रः। नादान्ते द्रवतीति वा रुद्रः। श्रुत्या वेदात्मना धर्माधर्मादीन् द्रावयतीति प्रापयतीति वा रुद्रः। श्रुत्या प्रणवरूपया स्वात्मानं प्रापयतीति वा रोरूयमाणो द्रवति प्रविशति मर्त्यानिति वा। रुद्रं संसारदुःखं द्रावयतीति वा अशुभद्रावको वा जहार पुनर्भवमिति वा रुद्रं शब्दं राति ददाति वा प्राणो रुद्र इति रुद्रं शब्दं वेदात्मानं ब्रह्मणे कल्पादौ ददाति वा रुद्रः। मन्यवे मन्युः क्रोधः। क्रोधात्मिका तव शक्तिः शांतरूपा भवतु मा बाधिष्ट भक्तान्। भक्तविषये तस्योपसंहारं प्रार्थयते। एवमिष्वादिकमपि वेदितव्यं।

Ends: एतत्सर्वं पश्चिमद्वारे शंभवालये कर्तव्यं।

वृषाधिरूढं देवेशं सर्वलोकैककारणं।
ध्यायेद्ब्रह्मादिभिस्तुत्यं पार्वतीसहितं शिवं॥

अस्य रुद्रसमुदायस्य केवलं जपमात्रेण सर्वसिद्धिर्भवति। त्रिषवणस्नायी जप्त्वा पंचपातकात् पूतो भवति। इत्येकादशानुवाकः।

Colophon:

इति भट्टभास्करविरचिते यजुर्वेदभाष्ये श्रीरुद्रभाष्यं नाम एकादशोद्ध्यायः॥ हरिः ओं शुभमस्तु। श्रीगुरुभ्यो नमः।

191. 22. H. 16.

THE RUDRAPRAS'NABHĀṢYA OF BHAṬṬABHĀSKARA

रुद्रप्रश्नभाष्यम्—भट्टभास्करकृतम्

Palm-leaf. 14 folia (44 sq.). 19″ × 1¾″. 11 lines in a page. Grantha script. Old. In good condition. Fair medium writing. Inked.

Incomplete at the beginning, the whole of the introduction except the last few lines being lost in a missing leaf. Same as the last.

Colophon: इति भट्टभास्करविरचिते यज़्र्भाष्ये श्रीरुद्रे एकादशोनुवाकः। अस्य रुद्रसमुदायस्य अघोरऋषिः . . . विनियोगः। श्रीरुद्रभाष्यम् समाप्तम्। हरिः ओम्। शुभमस्तु। श्रीगुरुभ्यो नमः॥

192. 20. C. 78.

THE RUDRAPRAS'NABHĀṢYA OF BHAṬṬABHĀSKARA

रुद्रप्रश्नभाष्यम्—भट्टभास्करकृतम्

Palm-leaf. 1 folio (the last of the codex). 16½″ × 1½″. 7 lines in a page. Grantha character. Old. Damaged. Clear medium writing. Inked.

A fragment of the commentary on the last Anuvāka.

Ends: एवन्दश दक्षिणाः दश प्रतीचीः दशोदीचीः दशोर्द्ध्वाः अञ्जलिं कुर्म्मः। तेभ्यो रुद्रेभ्यो नमः। ते च नो मृडयन्तु। ..... षाणम् यन्द्विष्मः। यश्च नः अस्मान्द्वेष्टि तं वः युष्माकमन्नम्। . मे दन्तनामैतत्। पार्श्वतो दन्तानाञ्जम्भा इत्यन्ये। जातावेकवचनम्। जंभेषु दधामि स्थापयामि। तम् भक्षय .....। रुद्रेभ्यो येन्तरिक्षस्थिताः एषां वात इति . . न्तरिक्षादभिवर्षितारः तेषाञ्च वात इषुस्थानीयः तेभ्यो नम इत्यादि पूर्ववत्। नमो रुद्रेभ्यो नये दिवि येषाम् ....मेवानामुपरिस्थिताम् तेभिवर्षन्ति तेभ्यो नम इत्यादि। तदेवं ये पृथिव्याम् येषामन्नमयेऽन्तरिक्षे येषां वातो ये दिवि येषाम् वर्षमिति स्थितेषु मन्त्ररूपेषु न .... तदिषवस्तेभ्य इत्यादि सर्वत्र समानम्।

Colophon: इति श्रीरुद्रप्रश्नस्य व्याख्या समाप्तः। हरिः ओम्। इति श्रीभट्टभास्करमिश्रविरचितम् श्रीरुद्रभाष्यम् समाप्तम्। कर .....न्तु महन्ति सन्तः॥

193. 20. C. 18.

THE RUDRAPRAS'NABHĀṢYA OF VIDYĀRAṆYA

रुद्रप्रश्नभाष्यम्—विद्यारण्यकृतम्

Palm-leaf. 31 folia. 13¼″ × 1½″. 8 lines in a page. Grantha script. Fairly recent. In good condition. Badly written in a medium hand. Uninked.

Complete.

Begins: ओम। अतः परमग्निकाण्डमग्न्याधेयमग्निचयने चरमायामिष्टकायां शतरुद्रियं जुहुयादिति। नमस्ते रुद्र मन्यव इति॥

Ends:

वृषाधिरूढन्देवेशं सर्वलोकैककारणं।
द्वयायेत्ब्रह्मादिभिस्तुत्यं पार्वतीसहितं शिवं॥

जपमात्रेण सर्वसिद्धिर्भवति। तृषवणस्त्रायी जपित्वा पञ्चपातकात्पूतो भवति।

Colophon (fol. 30*b*): इति श्रीविद्यारण्यविरचिते यजुर्वेदभाष्ये श्रीरुद्रैकादशोनुवाकः।

This is followed by

यावज्जीवं प्रणवमथवा वर्तयेद्रुद्रियं वा etc.

Looks like an abridgment of the commentary of Kausika Bhaṭṭabhāskara and is the same as the one described under No. 140 in the Descriptive Catalogue, Government Oriental Manuscripts Library, Madras, where appears the following note:

"This commentary is attributed to Vidyāraṇya, but it does not agree with Sayaṇa's commentary on this portion of the Kṛṣṇa-yajurveda as found in the IV Kāṇḍa thereof. Moreover it does not begin with the Maṅgalaśloka found in all the Vedic commentaries of Sāyaṇa. The work described in the next number is attributed to Vidyātīrtha, and appears to be an abridgment of this commentary. Therefore, this may be the commentary by Vidyātīrtha, who is known to have been a Guru of the well-known Vidyāraṇya."

Much more positive evidence than what is adduced here is required to accept Vidyātīrtha as the author of the commentary against the testimony of MSS. which ascribe the work sometimes to

Bhaṭṭabhāskara and sometimes to Vidyāraṇya, but never to Vidyātīrtha. Compare also the Mysore Descriptive Catalogue No. 599. The suggestion is based on the much disputed identity of Vidyāraṇya and Sāyaṇa. See Vamana Sastri, preface to Rudrabhāṣya, Ānandāsrama Series, No. 2; R. Narasimhachar, Indian Antiquary, 1916, pp. 1 sq.; P. V. Kane, History of Dharmasāstra, pp. 374 sq.; Guruvaṃsakāvya, Vanivilas ed., V, 41—44; R. Rama Rao, Indian Historical Quarterly, 1930, pp. 701 sq., 1934, pp. 801 sq.; Doraiswami Aiyangar, Journal of Indian History, Vol. XII, pp. 241 ff.

Nor is there anything of an evidence showing that Sāyaṇa wrote two commentaries on the Rudraprasna, one in his usual style (part of his Bhāṣya on the Taittirīya) and the other in quite a different one; but while this fact is not insufficient to prove a Vidyāraṇya different from Sāyaṇa it is, in the absence of further evidence, indecisive as to the identity of the author when we are confronted with more than one author of the name of the former. See R. Rama Rao, Indian Historical Quarterly, 1931, pp. 91-92; Keith, India Office Catalogue, Part 1, p. 712.

An abridgment of Bhaṭṭabhāskara's commentary, attributed to a Vidyāraṇya, is noticed under No. 136, Descriptive Catalogue, Government Oriental Manuscripts Library, Madras; another under No. 684, Tanjore Descriptive Catalogue.

194. 30. G. 15.

THE RUDRAPRAS'NABHĀṢYA OF VIDYĀRAṆYA

रुद्रप्रश्नभाष्यम्—विद्यारण्यकृतम्

Palm-leaf. 23 folia (foll. 12 ff.). 10¾″×1¼″. 9 lines in a page. Grantha character. Old. Worm-eaten and damaged. Good small writing. Uninked.

Complete.

Begins:

श्रीगणाधिपतये नमः ।

गुरवे सर्वलोकानां भिषजे भवरोगिणां ।

निधये सर्वविद्यानां श्रीदक्षिणामूर्तये नमः ॥

श्रीशारदांबायै नमः । अतः परमग्निकाण्डमग्न्याधेयमग्निचयनेन चरमायामीष्टकायां शतरुद्रीयं जुहुयादिति । नमस्ते रुद्र मन्यव इति ।

Ends:

वृ . . रूढं देवेशं सर्वलोकैककारणम् ।

ध्याये ब्रह्मादिभिः स्तुत्यं पार्वतीसहितं शिवम् ॥

जपमात्रे . . . र्वसिद्धिर्भवति । त्रिषवणस्नायी जपित्वा पञ्चपातकात्पूतो भवति ॥

Colophon: इति विद्यारण्यकृतौ श्रीरुद्रभा . . याजुर्वेदरुद्र एकादशोऽनुवाकः ॥ ११ ॥

ओं साम्बशिवार्पणमस्तु । शिवाय नमः । श्रीदक्षिणामूर्तिरुचरणारविन्दाभ्यां नमः ॥

The verses यावज्जीवं प्रणवमथवा etc. are not contained. Same as the one noticed above.

195. 9. F. 91.

THE RUDRAPRAS'NABHĀṢYA (VEDĀRTHAPRAKĀS'A) OF SĀYAṆA

रुद्रप्रश्नभाष्यम् (वेदार्थप्रकाश.)—सायणकृतम्

Paper. 27 folia (foll. 62 ff.). 9¾″ × 4½″. 9 lines in a page. Telugu script. Fairly

recent. In good condition. Clear medium hand.

Complete.

Begins: श्रीशंकरेशाय नमः। गुरुभ्यो नमः। हरिः ओं। प्रथमानुवाके प्रथमामृचमाह। नमस्ते रुद्र मन्यव उतो त इषवे नमः।

Ends: हे रुद्राः वो युष्माकं जंभे विदारितान्ये दधामि स्थापयामि।

Colophon: इति श्रीसायणाचार्यविरचिते माधवीय्ये वेदार्थप्रकाशके यजुःसंहितायां चतुर्थकांडे पंचमप्रपाठके एकादशोनुवाकः समाप्तः। श्रीगुरुभ्यो नमः।

Date:

आषाढशुक्लसप्तम्यां शुभकृन्नामवत्सरे।
रुद्राध्यायस्य टीकेयं सांबेन लिखिता मुदा॥

196. 20. C. 30.

THE RUDRAPRAS'NABHĀṢYA (VEDĀRTHAPRAKĀS'A) OF SĀYAṆA

रुद्रप्रश्नभाष्यम् (वेदार्थप्रकाशः)—सायणकृतम्

Palm-leaf. 22 folia. 15½″ × 1$\frac{1}{10}$″. 7 lines in a page. Grantha script. Old. Worm-eaten and damaged. Fair medium writing. Uninked.

Complete.

197. 34. C. 3.

THE RUDRAPRAS'NABHĀṢYA OF VEṄKAṬANĀTHA

रुद्रप्रश्नभाष्यम् वेङ्कटनाथकृतम्

Palm-leaf. 79 folia. 11¾″ × 1½″. 8 lines in a page. Grantha character. Wooden board at either end. Recent. In good order. Fair medium writing. Inked.

Complete.

Begins:

ईशानः सर्वविद्यानामीश्वरो निखिलात्मनां।
जयत्यखण्डसर्वज्ञो जगदादिगुरुश्शिवः॥
प्रसादितयजुश्शाखं प्रपद्ये शतरुद्रियं।
सारमुद्धृत्य रुद्राणां सम्यग्व्याख्या विधीयते॥

Ends: अत्र नमो रुद्रेभ्यो इत्यादिसमाप्त्यन्तं यजु . . यमेको मन्त्रः। अत्र देवा ऋषिश्च। रुद्र एव ध्यानं सहस्रश इत्यत्रोक्तमेव ग्राह्यं। अन्नसमृद्धिप्रदोयम्मन्त्रः। पुरश्चरणादिप्रकारः कृत्वोत्पादनजातिस्मरत्वादिफलभेदाश्च रुद्रकल्पादिषु द्रष्टव्याः प्रपञ्चिताः। समाप्त श्रीरुद्राध्यायप्रश्नः॥

Colophon: इति श्रीपरमहंसपरिव्राजकसार्वभौमश्रीमदद्वैतविद्याप्रतिष्ठाभिनवशंकरभगवद्विः कृतं श्रीरुद्रभाष्यं संपूर्णं॥

Published by the Vidyamudraksara Press, Kumbakonam, and by Vani Vilas Press, Srirangam. Though ascribed often wrongly to Abhinavas'aṃkara, this is not by him, but by his disciple Veṅkaṭanātha. See Bhagavaddatta, History of Vedic Literature, Vol. 1, Part II, pp. 125-26. The identity is proved by the author's reference to Pāṣaṇḍagajakesariṇī as his work both here (Rudra 2. 3) and in another of his works, *viz.*, Brahmānandagiri, Vani Vilas ed., p. 206. See K. Madhava Krishna Sarma, Adyar Library Bulletin, Vol. IV, Part IV, Manuscripts Notes.

198. 25. L. 25.

THE RUDRAPRAS'NABHĀṢYA OF VEṄKAṬANĀTHA

रुद्रप्रश्नभाष्यम्—वेङ्कटनाथकृतम्

Palm-leaf. 117 folia. 16½″ × 1½″. 5 lines in a page. Grantha character. Old. Worm-eaten and badly damaged. Fair large writing. Inked.

Complete. Same as the above.

Colophon: श्रीमत्परमहंसपरिव्राजकसार्वभौमश्रीमद्वैतविद्याप्रतिष्ठापनाभिनवशंकरभगवता कृतं श्रीरुद्रभाष्यं समाप्तं ॥

At the end: ओमबुब्रैव सर्ववत् ।

प्रजोत्पत्तिनमके वर्षे कन्यामासे बुधे सिते ।
वञ्चेन्यां वेतवने लिखितं रुद्रभाष्यकं ॥

लिखितं ब्रह्मविदुषा सुब्बूनाम सुयज्वनां ।
तदिदं भाष्यं श्रीविश्वरूपेन्द्रस्वामिनाम् । हरिः ओम् ।

199. 30. H. 26.

THE RUDRAPRAS'NABĀṢYA OF VEṄKAṬANĀTHA

रुद्रप्रश्नभाष्यम्—वेङ्कटनाथकृतम्

Palm-leaf. 48 folia. 14¼″ × 1¼″. 5 lines in a page. Grantha character. Fairly old. In good condition. Cursive medium writing. Inked.

Incomplete, breaking off in the 7th Anuvāka.

Begins: श्रीमहागणाधिपतये नमः । इत्थं श्रीरुद्रस्य सकलपापनिवर्तकत्वेन सर्वोपासनफलप्रदत्वेन च कर्मोपासनादि उपासनं ज्ञानकाण्डात्मकसकलमेव तत्वं तत्र च श्रुतिस्मृतीतिहासपुराणानि तत्तात्पर्यतः न्यासविधिश्चेत्येतत्सर्वं निरूपितं । इदानीं श्रीरुद्रोपनिषदमर्थतो व्याख्यास्यामः । अत्र हि एकादशानुवाकाः । तत्राद्यो भगवतः प्रसादनं । द्वितीयादिषु अष्टसु सर्वेश्वरत्वसर्वात्मकत्वसर्वान्तर्यामित्वादिरूपेण भगवन्नमस्कारः । ततो दशमे भगवतः प्रार्थना । एकादशे भगवदंशरुद्रसंघप्रार्थनेति एकादशानुवाकात्मकश्रीरुद्राध्यायार्थः । तत्र तावन्निजपापकुपितमीश्वरं प्रसादयितुन्नमस्करोति । नमस्ते रुद्रेति । हे रुद्र हे प्रणतदुःखविद्रावक । ते तव । मन्यवे क्रोधाय । नमोस्तु । न च निरस्तसमस्तदोषे निखिलकल्याणगुणसमुद्रे च भगवति कथं क्रोधप्रसक्तिरिति वाच्यं । दुष्टनिग्रहशिष्टानुग्रहस्वभावे निगूंण्यविषयस्य अलंकारत्वेन अदोषत्वात् ।

श्रुतिस्मृतिर्म्ममैवाज्ञा यस्तामुल्लंघ्य वर्तते ।
आज्ञाच्छेदी स मद्वेष्यः स मे वध्यश्च जायते ॥

इति भगवतोक्तत्वात् न चैवं वैषम्यनैर्गृण्यप्रसंग यिति वाच्यं । तत्तत्प्राणिकर्म्मानुसारेण निग्रहानुग्रहौ कुर्वतः तस्य तदप्रसक्तेरिति ब्रह्ममीमांसायां परं प्रपंचितं । अत्र रुद्रेति हेतुगर्भसंबोधनं । अत्र रुद्रशब्दो हि रु द्रावयतीत्यर्थे ।

रद्दुःखं दुःखहेतुर्वा तद्द्रावयति नः प्रभुः ।
रुद्र इत्युच्यते तस्माच्छिवः परमकारणम् ॥

इति पौराणिकैर्व्युत्पादितः पृषोदरादिः । तथा च पृणतदुःखतद्धेतुर्पापद्रावकस्य तव पृणते मयि पापनिवर्त्तकम् । क्रोधः परिहर्त्तुं युक्त एव अभिप्राये द्रष्टव्यः । भगवन्तं प्रसाद्य तथा युयान्यपि नमस्कारेण प्रसादयति । उतो त इति । अपि चेत्यर्थः । हे रुद्र ते तव सुमृतिरूपस्वबाणाय नमोस्तु । तथा इष्वावादनभूताय ते तव धन्वने धनुषे नमोस्तु । धनुर्बाणव्यापृश्रुतिस्मृतिरूपस्वज्ञाविलंघिने पापिष्ठाय परमेश्वरः क्रुद्धयति । ततस्तत्प्रहरणार्थमिषुरूपाविष्ट ते ततस्सदोपादाने दृष्टि-

र्भवति। ततो धनुर्बाणगृहणाय बाहुभ्यांब्रीयते इति क्रमः। अनेन क्रमेणात्र नमस्कारक्रमः। अनन्तविचित्र-शक्तेर्भगवतो दिव्यशक्तिविलासरूपा जगदुपास्यदेवत-मूर्तय एव इष्टादय इति तन्नमस्कारप्रार्थनादिकं युक्तमेव।

Ends: तथा अश्वादिसञ्चारयोग्यः प्रौढमार्गः पथाः तत्र भवः पथ्यः। कुत्सितमटति जलमत्रेति अटो अल्पजलप्रदेशः। तत्र भवः काट्यः। यत्र जलं न्यक् भावेन पतति स देशो नीपः। तत्र भवः नीप्यः। सूदः कर्दमः। तत्र भवस्सूद्यः। सरः प्रसिद्धः। तत्र भव सरस्यः। नद्यां भवो नाद्यः। अल्पसरो वेशान्तः। तत्र भवो वैशन्तः। आपे भवः आप्यः। अवटे गर्त्ते भवोवाट्यः। वर्षे भवो वर्ष्यः। वर्ष्याभावो अवर्षः। तत्र भवो अवर्ष्यः। वर्षतादभावयोः प्रेरत इत्यर्थः। मेखे भवो मेघ्यः। विद्युति भवो विद्युत्यः। ईध्यं निर्मलत्वेन दीप्यमानं शरदर्भ तत्र भवं ईध्रियः। आतपे भवः आतप्यः।

200. 28. J. 54.

RUDRAPRAS'NABHĀṢYA—ANONYMOUS

रुद्रप्रश्नभाष्यम्—अज्ञातकर्तृकम्

Palm-leaf. 42 folia. (35 ff.). 12½" × 1¼". 8 lines in a page. Grantha script. Wooden board at either end. Fairly recent. In good condition except for a few worm-holes. Closely written in a cursive medium hand. Inked.

Complete.

Author's name does not appear. Differs from those attributed to Bhaṭṭabhāskara and Vidyāraṇya, but at places looks like an abridgment of the commentary of Kausika Bhaṭṭabhāskara.

Begins:

अतः परमग्निकाण्डमभ्यार्षेयं। तत्र चरमायामिष्टकायां शतरुद्रीयं जुहोति नमस्ते रुद्रमन्यव इति। रुद्रो वा एष यदग्निः स एतर्हि जातः इत्यादि ब्राह्मणम्। अत्र श्रुति-स्मृतिपुराणादिषु प्रसिद्धं मोक्षस्वर्गवित्तारोग्यायुर्भवती-ष्टयादि फलानि बहूनि विद्यन्ते। तेषु केचित् प्रयोग-विशेषाः प्रतिमन्त्रं वक्ष्यन्ते। अस्य श्रुतिस्मृतिपुराणोक्ता बहवो महिमानुगुणा लक्ष्यन्ते। तत्र कांश्चिद्वयं ब्रूमः। अत्र जाबालोपनिषत्—अथ हैनं ब्रह्मचारिण ऊचुः जप्येनामृतत्वं ब्रूहीति। सहोवाच याज्ञवल्क्यः शत-रुद्रीयेणेति। एतानि ह वा अमृतस्य नामधेयानि एतैर्हवा अमृतो भवतीति। तस्मादविमुक्तमाश्रितो भवति यः शतरुद्रमधीते। सोग्निपूतो भवति। स वायुपूतो भवति। ब्रह्महत्यात् पूतो भवति। सुरापानात् पूतो भवति। अगम्यागमनात्पूतो भवति। आह शातातपः—

स्तेयं कृत्वा गुरुदारांश्च गत्वा
सुरां पीत्वा ब्रह्महत्यां च कृत्वा।
भस्मच्छन्नो भस्मशय्याशायानो
रुद्राध्यायी मुच्यते सर्वपापैः॥ इति।

आह याज्ञवल्क्यः—

सुरापरवर्णहारी च रुद्रजापी जले स्थितः।

तथा—

सहस्रशीर्षजापी च मुच्यते सर्वकिल्बिषैः॥
सर्वपापहराह्येषा रुद्रैकादशिनी मता।
वेदमेकगुणं जप्त्वा तदहे च विशुद्धयति॥
रुद्रैकादशिनीं जप्त्वा तदहैव विशुद्धयति।

आह शंखः— स्वर्णस्तेयद्राद्राध्यायी मुच्यत इति।

आहतुरत्र्यङ्गिरसौ—

एकादशगुणान्वापि रुद्रानावर्त्य धर्मवित्।
महापापैरपि स्पृष्टो मुच्यते नात्र संशयः॥

वायुपुराणे—

यश्च रुद्रान् जपेन्नित्यं ध्यायमानो महेश्वरं ।
यश्च सागरपर्यंतां सशैलवननाननां ॥
दद्यात्कांचनसंयुक्तां भूमिमोषधिसंयुतां ।
तस्मादाप्यधिकं तस्य सकृद्रुद्रजपाद्भवेत् ॥
मम भावं समुत्सृज्य यस्तु रुद्रान् जपेत्सदा ।
स तेनैव च देहेन रुद्रस्संजायते ध्रुवम् ॥
जपेनानेन विप्रेन्द्राः पापाश्चान्ये द्विजातयः ।
हित्वैव सकलं पापं गताश्शिवं पुरा ॥
अहं च परमेशस्य सामीप्यं लब्ध्ववांस्तथा । इति ।
चमकं नमकं होतृन् पुरुषसूक्तं जपन सदा ।
प्रविशेत्समहादेवं ग्रहं ग्रहपतिर्यथा ॥
भस्मदिग्धशरीरस्तु भस्मशायी जितेन्द्रियः ।
सततं रुद्रजाप्येव परां मुक्तिमवाप्स्यति ॥
रोगवान् पापावांश्चैव रुद्रान् जत्वा जितेन्द्रियः ।
रोगात्पापात्प्रमुच्येत रुद्रलोकं च गच्छति ॥
रुद्राद्ध्यायी वसेत्यत्र ग्रामे वा नगरे ऽपि वा ।
न तत्क्षुत्पिपासाद्या द्रर्भिक्षा व्याधयो ऽपि वा ॥

आह शंखणः—रहसि कृतानां महापातकानामपि शत रुद्रीयं प्रायश्चित्तमिति । आपस्तम्बश्च—यस्य रुद्रः प्रजां पशूनभिमन्येतोदङ् परेत्य रुद्रान् जपेत् इत्ययज्ञसंयुक्तः कल्पः । एकशतमद्ध्युशाखास्तासु सर्वासु रुद्रोपनिषदाम्नायते । शतं रुद्रा देवतास्येति शतरुद्रीयमुच्यते । अनया रुद्रोपनिषदा ब्रह्मविद्याया ब्रह्मविद्या प्रतिपद्यते । ब्रह्मणश्च त्रीणि रूपाणि संति एकं कार्यरूपं । इतरत्

चमकं नमकं चैव पुरुषसूक्तं तथैव च ।
नित्यं त्रयं प्रयुंजानः शिवलोके महीयते ॥

पुरुषाख्यं सृष्टिस्थितिसंहारनिमित्तं । अन्यत् परं रूपं निर्विकल्पं निरंजनं सत्यज्ञानानन्तानन्दलक्षणं तदेतद्रषिणाप्युक्तं—विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् । सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमोस्तु । यो देवानां प्रथमं पुरस्ताद्विश्वाधिको रुद्रो महर्षिः । हिरण्यगर्भं पश्यत जायमानं स नो देवश्शुभया स्मृत्या संयुनक्तीति । यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्त्विति । ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोमिति ।

क्वचित्क्वचिदनाभोग्यः क्वचित्क्वचिदनाविलः ।
जयत्यनादिनिधनो महादेवो महार्णवः ॥

इति ।

मूर्त्यष्टकमधिष्ठाय बिभर्त्तीदं चराचरम् ।
आमनुत्वमधिष्ठाय सृष्टयादि च करोति च ॥

स तत्र योसौ संहारकर्ता तं देवस्सर्वदाधितिष्ठति । कार्यकालेत्वन्या स च देवस्य घोरा तनूः अन्या शिवा यथोक्तं तस्यैते तनुवौ घोरान्या शिवान्या चेति । शक्तिश्चापि विचित्रा सा सर्वदा सहकारिणी । यच्छतरुद्रीयं जुहोति यैवास्या घोरा तनूस्तांतेन शमयति । ततस्तान्युपसंहार्य प्रथमेनानुवाकेन देवं प्रसाद्य द्वितीयप्रभृतिभिरष्टभिरनुवाकैर्देवं वैश्वरूपेण स्तुत्वा त्वान्नमस्कारं च करोति । एवं हि देवस्सुतरां प्रसीदति । ततो दशमैकादशाभ्यामभयं याचते । देवो हि परमस्वातन्त्र्य भूमिः किंचिदधिष्ठाय निग्रहानुग्रहौ जगतः करोति । तथा हि यक्षरूपेणागत्य देवान्व्यामोहयामास । विटवेषधारी सपत्नीकानृषीन्वृतात् प्रेषयामास । किरातवेषालंकृतस्सन् पाण्डुसुतेन सह चिक्रीड । चण्डालाकृतिमास्थितः कस्यचित् भृत्यस्याश्याकारमभ्यर्चित प्रविवेश । एन्द्रेण रूपेण कंचित् भृत्यं तपसश्च्यावयितुमियेष । अर्भकरूपेण देव्या उत्संगमधिशिश्ये । औलंकेन वपुषा कस्मै-

चिद्रषये ज्ञानमुपदिदेश । भूविवरभ्रष्टं हविः कस्यचित् भृत्यस्य तत्रैवं कृतसंनिधानो बुभुजे । एवंविधवेषधरविग्रहपरिग्रहेण क्रीडतो देवस्य लीलाविलसितमिदं विश्वं वश्यं वर्तते । अतो वैश्वरूप्येण स्तुत्वा नमस्करोतीति । यथोक्तं—

चरितानि विचित्राणि गुह्यानि गहनानि च ।
ब्रह्मादीनां च सर्वेषां दुर्विज्ञेयो हि शंकरः ॥

अस्य श्रीरुद्रप्रश्नसमुदायस्य भगवान्नग्निकाण्ड ऋषिः । महाविराट् च्छंदः । शंभुर्देवता । अथास्य पुरश्चरणं कृच्छ्रं चांद्रायणं वा सामान्यप्राप्तं कृत्वा अष्टासहस्रं जपेत् । कृतपुरश्चरणो भवति । अथ कर्माणि कुर्यात् । यद्यदुद्दिश्य अष्टासहस्रमष्टाविंशतिमेकविंशतिमेकादश वा जपं कुर्यात्तत्तदभीष्टमीश्वरप्रसादाल्लभ्यन्ते । जपसाद्गुण्यार्थं ब्राह्मणान् भोजयेत् । एकादशवारमावर्त्य शिवस्याभिषेकादभीष्टं सकलं लभते । तत्र बोधायनः— अथातो रुद्रस्नानार्चनाविधिं व्याख्यास्यामः । इति विधिमप्युक्त्वा फलमप्याह—श्रीकामश्शन्तिकामः पुष्टिकामस्तुष्टिकामो मोक्षकामो व्याधिमोचनार्थी पापक्षयार्थी च कुर्यात् दश गास्सवत्सा स्वर्णभूषिता ऋषभैकादशा एकां गां दक्षिणां दद्यादित्याह भगवान् बोधायनः । यद्वा उदकपूर्णं कुंभं रुद्रेणाभिमंत्र्य शतसंख्या सहस्रसंख्या वा साद्ययमभिषिंचेत् । नीरोगं शतायुष्यं लभते । अपमृत्युं जयति । नमस्ते रुद्र इत्यस्य काण्डऋषिः । अनुष्टुप् छंदः । रुद्रो देवता ।

आकर्णकृष्टे धनुषि ज्वलन्तं
दैवीमिषुं भास्वति संदधानं ।
द्रष्टायेन्महेशं महनीष्ववेषं
देव्या युतं मौ . तनुं युवानं ॥

अथास्य पुरश्चरणं कृच्छ्रं द्वादशरात्रं जप्त्वा एकादशसहस्रमभिहितं दिनानि निरंतरं जपेत् । कृतपुरश्चरणो भवति । ततो शेषपापं नश्यति लक्षजपात् । ततोनेन मंत्रेण प्रदक्षिणनमस्कारं च कुर्यात् । ततो दक्षिणामूर्तिसंनिधावेकादशसहस्रं जपात् सहस्रजन्मकृतपापं नश्यति । तस्मिन्नेव दक्षिणामूर्तिसंनिधावग्निमाधाय घृतपायसं श्रपयित्वायुतं जुहुयात् । साक्षाद्देवं पश्यति । तस्मिनेव वा सर्वतोरत्निमात्रं कुण्डं खात्वा साग्नौ कापिलेन घृतेन शतसहस्रं जुहुयात् । गाणपत्यं लभते । शतं रुद्रास्य देवताः संतीति तेषां रुद्राणामिदं शतरुद्रीयं । अत्र शिवः परमात्मा स्तूयते । क्वचिदेकः क्वचिन्नानायोनिषु सर्वत्र शिवावतार श्रूयते । यत्र यत्र शिवां शस्याविभावः तत्र महत्वं दृश्यते देवेषु ब्रह्मादयः असुरेषु बलिबाणादयः मनुष्येषु धर्मपुत्रादयः मृगेषु गवादयः स्थावरेषु मेरुप्रभृतयः वृक्षेषु कल्पकादयः कृमिष्वपि वज्रकीटादयः श्रूयन्ते । अत एव वृक्षादीनामपि नमस्कारं क्रियते । नम इति प्रह्वार्थे । रुद्र इति । सर्वमन्तकाले रोदयतीति रुद्रः । रुजं संसारं द्रावयतीति रुद्रः रुक् प्रणवः तेनात्मानं प्रति पादयतीति वा रुद्रः । मन्यवे सर्वेषां हिंसासाधानानां मन्युः प्रसाधनत्वात् अस्त्विति सर्वत्रानुषज्यते । उतो इति चकारार्थः । इषवे बाणाय अच्युतानिलसायकमिति पुराणे । धन्वने तदपि रत्नसानुशरासनमिति प्रसिद्धं । बाहुभ्यामिति रुद्रस्यानेकबाहवः । अत्र पूर्वोक्तधनुर्बाणधरौ बाहू उच्येते । ताभ्यां नम इति भावः ॥ १ ॥

यात इषुरित्यस्यात्रेयऋषिः । अनुष्टुप् छंदः । शंभुर्देवताः ।

ध्यायेद्देवं सुस्मितं स्यंदनस्थं
देव्या सार्द्धं तेजसा दीप्यमानं ।
इष्विष्वासालंकृताभ्यां कराभ्यां
शूराकारस्तूयमानं सुरौघैः ॥

. . . . . .
. . . . . .

Ends :

ये दिवि स्थिता रुद्रा येषां वर्षमिषवः वर्षेनैव मारयितव्यान् मारयति तेन्य इति सर्वं पूर्ववत् ।

किं किं न सिद्धयति नृणां साधकानां धृढात्मनां ।
प्रायच्छत्यखिलान् कामान् देहांते परमां गतिम् ॥
उक्तं रुद्रप्रभावेन सर्वमेव यथातथं ।
सार्वभौमकरं होमं कलशस्थापनं तथा ॥
जातिस्मरक्रियापुण्या सर्वमुक्तं विशेषतः ।
अपमृत्युंजयं कर्म राज्ञामेव विशेषतः ॥
सर्वमेतदनेनैव साद्धयं तद्भक्तियोगतः ।
इत्येकादशानुवाकः ।
सर्गवत् पुराग्निरालोकं येदेतं निष्कलं परं ।
चिदानंदमयं ज्योतिस्स आद्यः केवलः शिवः ॥
स एवादौ रजोरूपं सृष्ट्वा ब्राह्मणमात्मनः ।
सृष्टिः कर्मनि युक्ताश्च तस्मै वेदाश्च दत्तवान् ॥
पुरश्च जगतामीश आत्मतत्वैकसंग्रहं ।
सर्वोपनिषदां सुरा रुद्राद्धयायं च दत्तवान् ॥
यदेकमस्य यं साक्षात् ब्रह्मज्योतिस्सनातनः ।
शिवात्मकं परं तत्वं रुद्राध्याये प्रतिष्ठितं ।
स आत्मभूस्सृजन्विश्वं चतुर्भिर्वेदनैर्विराट् ॥
ससर्ज वेदांश्चतुरो लोकानां स्थितिहेतवे ।
तत्रायं यजुषोर्मद्धये ब्रह्मणो दक्षांसमुखात् ॥
अशेषा उपनिषत्सारो रुद्राद्धयायः सुमुद्गतः ।
स एव मुनिभिः पूर्वैः मरीच्यत्रिपुरोगमैः ॥
सहवेदैर्द्दृतस्तेभ्यस्तच्छिष्या जगृहुश्च तं ।
तच्छिष्यपुत्रैस्तत्पौत्रैः पारंपर्यक्रमागतैः ॥
धृतो रुद्रात्मकस्सोयं वेदसारवृसानितः ।
एष एव परो मंत्र एष एव परं तपः ॥
रुद्राद्धयायं जपन् पुंसां परं कैवल्यसाधनम् ।
ये महावातकैर्युक्ता उपपातकिनश्च ये ॥
रुद्राद्धयायजपांस्तेपि यांति परां गतिं ।

इति ब्रह्मोत्तरखण्डे रुद्रभाष्यं समाप्तं । शुभमस्तु ॥

201. 40. E. 42.

THE RUDRAPRAS'NABHĀṢYA OF MAHĪDHARA

रुद्रप्रश्नभाष्यम्—महीधरकृतम्

Paper. 8. folia (marked 1—10, evidently by a later hand which does not note the missing folio in which is lost the commentary on the first 9 Ṛks; foll. 5 and 6 are missing). $9\frac{3}{4}'' \times 4\frac{1}{4}''$. 13—17 lines in a page. Devanāgarī script. Old. Much worn; edges frayed. Cursive medium writing.

Incomplete, Ṛks 1.1—9, 3.4—5. 6 and 11.4—10 (together with the Pariśiṣṭa) being wanted. The first two folia contain in the same hand as the rest the following commentary on Anuvāka 2. 9 of the Maitrāyaṇī Saṃhitā. There is nothing here to show that this does not form part of the commentary.

आ त्वेत्यस्य हिरण्यगर्भऋषिः । निचृज्जगती च्छंदः । शर्वो देवता । आवाहने विनियोगः । आत्वा वहन्त्विति । हे शर्व शृणोति हिनस्ति सर्वानपि दुष्टान् दैत्यादीन् वैदिकमार्गरक्षणायेति शर्वो दुष्टघातको महादेवः । तस्य संबोधनं हे शर्व दुष्टहिंसक । सुचेतसः सुप्रज्ञाः । हरयः हरंति भक्तगृहान् प्रतीति हरयो भक्तगृहप्रापकाः । वाताः वांति अतिशीघ्रं गच्छंतीति वाताः अतिशीघ्रगामिनः नंदिभृंग्यादयो गणाः । ते मनोजवैः बलवद्भिः प्रजावद्भिः श्वेतैः श्वेतवर्णैः अश्नुवते ध्मानमित्यश्वा वृषभाः । तैः जवैः जवंते पर्यायेण गच्छंति वाहयंति इति जवाः । पर्यायेण स्वयं गच्छंतः संतः शर्वं वाहयन्त इत्यर्थः । तै शर्वं वाहयद्भिः स्वयं गच्छद्भिः वृषभैरनेकैरनंतैः एकस्य वा सतः नानारूपाविष्कारेणानेकैरीश्वरस्य यथाभिप्रायं नानाविग्रह-

वद्भिः । त्वा त्वामिमाम् । अस्मिन् यज्ञे महारुद्रातिरुद्रादिरूपे । हव्याय हूयमानाय तिलादिद्रव्याय । तद्भव्यं आदितुमित्यर्थः । तुमर्थाच्च भाववचनादिति चतुर्थी । त्वा त्वां । आवहंतु आभिमुख्येन प्रापयंतु ॥ १ ॥

देवानामिति । अनुष्टुप्छंदः । शिवो देवता । आवाहने विनियोगः । यतः पूर्वस्यां हरयो वाताः दुष्टहिंसक त्वं त्वां आवहंतु इति प्रार्थितं अतोस्यामनंतरायां शि . . . णावाहनमुचितं । शर्वेत्यनुवर्तते । हे शर्व देवानामिन्द्रादीनां ऋषीणां च भरद्वाजादीनां पूर्वजं असुराणां हिरण्याक्षादीनां विष्णुरूपेण शुंभनिशुंभादीनां च देवीरूपेण तारकादीनां च स्वामिकार्तिकेयरूपेण अंधकजासंघरादीनां च स्वात्मरूपेण हंतारं संतं पूर्वजं पूर्वं जातं अत एव महादेवं महांतं अतिप्रभूतं संतं देवं दानादिगुणयुक्तं सहस्राक्षं सर्वलोकसाक्षिणं शिवं कल्याणकारिणं अहमावाहयामि अभिमतसिद्धये ॥ २ ॥

तत्पुरुषायेति । सर्वत्र तदिति पदद्वयं वरीवर्ति । तदुभयमप्येकार्थं । तत्राद्यं चतुर्थ्यन्तं । द्वितीयं हेतौ पंचम्यन्तं । तत्राद्यं चतुर्थ्यन्तं । द्वितीयं पंचम्यन्तं । विद्महे इति सर्वत्र । धीमहीति च । प्रचोदयादिति च । तेन एकमंत्रव्याख्यानेन सर्वेषामपि व्याख्यानं बोद्धव्यम् । अन्यानि पदानि तत्र तत्र व्याख्येयानि । अथ व्याख्या । आ त्वा वहंतु हरय इति प्रार्थनायां कृतायां देवानां चेति आवाहने कृते सति तत्पुरुषायेति । तत् तस्मै श्रुतिस्मृतीतिहासपुराणाग . . . . . मादिसिद्धाय पुरुषाय पुरि शरीरे बुद्धौ वा विषयोपलब्ध्यर्थं सादते । यद्वा पुरुषाय पुरि शयाय पुरि शरीरे बुद्धौ वा विशेषेण शयानाय वर्तमानायेत्यर्थः । अथ वा पुरुषाय पु पूरुषेण येन सः सर्वं जगत इति पुरुषः । तस्मै पुरुषाय जगद्व्यापिने इत्यर्थः । एतादृशाय महादेवाय त्वं प्रसादयितुं । तुमर्थादिति चतुर्थी । विद्महे वयं सपरिवाराः श्रवणमननिदिध्यासनादिभिः सम्यक् जानीमः । अत एव तस्मै धीमहि अहनि प्रार्थयेमहि प्रार्थयामः । तत् तस्माद्धेतोः नोस्मान् रुद्रः रुद्रो रौतीति सतो रोरूयमाणो द्रवतीति वा रोदयतेर्वा यदरूदत् तद्रुद्रस्य रुद्रत्वमिति काठकं । यदरोदीत्तद्रुद्रस्य रुद्रत्वमिति **हारिद्रविकमिति यास्कः** । अथैतस्य **दुर्गसिंहकृतं भाष्यम्** । रुद्रः कस्मात् रौतीति सतः । सहि स्तनयित्नुशब्दं करोति । रोरूयमाणो द्रवतीति वा शब्दं कुर्वाणो मेघोदरस्थो द्रवतीति । रोदयतेर्वा शत्रून् रोदयति दुःखयति । ब्राह्मणमपि च तस्मिन्नर्थे भवति—हदरुदत्तद्रुद्रस्य रुद्रत्वम् इति काठकं । कठानां प्रवचनम् । ऐतिहासिकैरेतत्समवैति । स किल पितरं प्रजापतिमिषुणाविध्यत् । तमनुशोचन्नरुदत् । तद्रुद्रस्य रुद्रत्वम् यदरोदीदिति **हारिद्रविकं** । स एवार्थः केवलं शाखान्तरमन्यत् । एवं शाखान्तरेभ्यो ऽपि देवताभिधाननिर्वर्चनान्युपेक्ष्याणीति । उप प्रदर्शनार्थे । **हारिद्रवो नाम मैत्रायणीयानां** शाखाभेदः इति । एतन्निर्वचननिरुक्तो रुद्रो नोस्मान् प्रचोदयात् प्रेरयतु । धर्म्ये कर्माणि महारुद्रातिरुद्रौ इति प्रार्थयामः ॥ ३ ॥

तत् गां गौर्येति । गाः स्तुतिरूपाः श्रुतिस्मृतीतिहासपुराणादिसंबन्धिनीः महादेवविषयिणीः वाचः । अंचति पूजयति यद्वा गच्छति प्राप्नोति तात्पर्येण शृणोतीति गोवी । हिमालयपत्न्या मेना । तस्याः अपत्यं गौच्यः । स्त्रीभ्यो ढगिति ढकि प्राप्ते व्यत्ययेन गर्गादिभ्यो यगिति यक् । किति वृद्धिः । तेन गौच्यो मेनासुतः मैनकः । मेनासुता पार्वती । गिरेः हिमावलस्य सुतः मैनाकः । सुतापि सैव पार्वती । अग्निरूपत्वेन अतिपराक्रमत्वेन च पुंस्त्वमुभयोः शब्दयोः । ततश्च तत्तत्प्रसादयितुमित्यर्थः । (. . . . . र्णीया पुंस्त्वं जातवेदस इति **सायणमाधवशंकरप्रभृति** . सोपपत्तिकं व्याकृतं । इह तु विस्तरभिया न लिख्यते ।) वयं विद्महे जानीमः । धीमहि ध्यायेमहि

च । तत्तस्मान्नोस्मान् गौच्या गिरिसुता गौरी पार्वती जगदंबा दुर्गा प्रचोदयात् प्रेयतु मत्कर्मणीति महादेवगायत्र्यनन्तरं देवीगायत्र्या उचितत्वादानंतर्यं ॥ ४ ॥

तत्कुमारेयति । कौ पृथिव्यामवतीर्णः सन्मारयति तारकादीनिति कुमारस्वामि कार्तिकेयः स्तस्मै । कार्तिकेयाय षण्णां कृत्तिकानामत्यं कार्तियस्तस्मै । स्कंद स्कन्दति गच्छति शोषयति वा शत्रूनिति स्कंदस्तस्मै । अन्यत्पूर्ववत् । पित्रोरनन्तरं ज्येष्ठपुत्रगायत्र्या औचित्यं ॥ ५ ॥

तत्कराटायेति । कराटाय विकटाय शत्रूणामतिभयानकाय । हस्तिवन्मुखं यस्यासौ हस्तिमुखस्तस्मै । दंता प्रशस्तौ दंतौ विद्येते यस्यासौ दंती । औरसस्कंदाख्यपुत्रानन्तरं अनौरसस्य विघ्नहरस्य गायत्र्युचिता ॥ ६ ॥

तच्चतुर्मखायेति स्पष्टो ऽर्थः ॥ ७ ॥

सपरिवारमहादेवानन्तरं विष्णुगायत्र्या औचित्यम् ॥ ८ ॥

तद्भास्करायेति । भासं प्रकाशं करोतीति भास्करः तस्मै भारूपे धामेत्यर्थः । स्वतःप्रकाश इति यावत् । प्रभां स्वत एव स्वस्य भां भानं प्रकाशं करोतीति प्रभाकरः । तस्मै स्वयं स्वत एवात्मानं प्रकाशयन् सकलं जगत्प्रकाशयतीत्यर्थः । दीप इव नानापदार्थान् भानुः भाति चतुर्दशभुवनमध्ये अग्न्यादिस्वयं प्रकाशेभ्यः अधिकं दीप्यत इति भानुः । सविता शिवब्रह्मविष्णुभ्योनन्तरं तत्त्रयीरूपत्वेन वेदत्रयीरूपत्वेन भानुगायत्र्या औचित्यम् ॥ ९ ॥

तत्सोमराजेति । सोमश्चासौ राजा च सोमराजः तस्मै सोमराजाय सोमाभिधाय द्विजराजायेत्यर्थः । सोमोस्माकं ब्राह्मणानां राजेत्यादि श्रुतितः द्विजराज इति नामप्रसिद्धेश्च । महाराजाय महांश्चासौ राजा च महाराजः तस्मै महाराजाय असपत्नराजाय ते इत्यर्थः । चंद्रः चंदति अह्लालब्दयति सकलं जगदिति चंद्रः । चिदि आह्लादे । चंद्रः चंदते कांतिकर्मण इति यास्कः । भानोरनन्तरं

राजा रविः शशी राजा मगलो मण्डलेश्वरः ।
इतित्यादिज्योतिःशास्त्रतः भानो पत्युरनन्तरं
तत्पत्न्याः सोमस्य गायत्र्या औचित्यम् ॥१०॥

तजसनायेति । वैश्वानराया वैश्वानरः . . स्माद्विश्वानरान्नयति विश्व एनन्निर्वचननिरुक्ता मा वह्निः वहति देवेभ्यो हविः प्रापयतेति वह्निः इति । देवानामतिवदत्र यस्य सोमस्य हवनाधिकरणं देवेभ्यश्च हविषां वोढा वह्निरेवेति सोमानन्तरं वह्निगायत्र्या औचित्यं ॥ ११ ॥

तत्यजपायेति । त्यजात् क्रौध्मन् प्राप्तेष्वपराधेषु देवादीनां संबन्धिनः सकाशात् पाति रक्षतीति त्यजपः स्तस्मै । त्यजपाय देवादीनां क्रोधात्राकर्त्रे । हेलः हरः हणिः त्यजः इति क्रोधनामसु पाठात् । महाजपाय महांश्चासौ जपश्च महाजपः यथोक्तपुरश्चरणादिरूपस्तस्मै महाजपाय । ध्यानः ध्याप्यते अस्मिन् देवतेति ध्यानो ध्यानाधिकरणं महाजप एव । इति पुरश्चरणरूपस्य महाजपस्य अहुतो न फलप्रद इति वचनात् होमस्यात्यावश्यकत्वात्तद्दशांशस्य तदधिकरणत्वाच्च वह्नेस्तदानन्तर्यं महाजपगायत्र्या औचित्यं ॥ १२ ॥

तत्परमात्मायेति । परमात्माय परमात्मने सकलजीवाधिष्ठानाय । वैनतेयाय विशेषेण नतान्नम्रभूतान्परमात्मानं प्रतीति । विनता जगत्सृष्टिकारणमविविद्या तत्संबन्धिने तया नित्यमुक्तायेत्यर्थः । अत एव

जीव ईशो विशुद्धा चित्तेषां भेदः परस्परम् ।
अविद्या तच्चितोर्योगः षडस्माकमनादयः ॥

इति वेदान्तरहस्यम् । अत एव ताभ्यां जायमाना सृष्टिजोस्मान् प्रचोदयादिति । परमात्मनश्च जगदधिष्ठानत्वेन सर्वानंतर्यमुचितमिति सर्वशेषतद्गायत्री समाम्नाता ।

मंगलार्थं समाम्नातो व्याख्यातोप्यनुवाकक: ।
आ त्वा वहंतु हरय: पूर्वोसौ शतरुद्रियात् ॥

The rest agrees with this part of the author's Vedadīpa on the Vājasaneyi Saṃhitā. The bracketed sentence is added on the top of the page, the place of omission being marked ×. The Mantramahodadhi of Mahīdhara contains at the end the chronogram

विक्रमार्काद्गते वर्षे बाणवेदनृपै (१६४५ = A. D. 1588) मिते ।

The author is therefore much later than Sāyaṇa and there is nothing chronologicaly impossible about his reference to the latter.

For this see K. Madhava Krishna Sarma, Adyar Library Bulletin, Vol. IV, Part 4, Manuscripts Notes.

202. 20. O. 26.

THE RUDRAPRAS'NABHĀṢYA (KALPALATĀ) OF AHOBALA

रुद्रप्रश्नभाष्यम् (कल्पलता)—अहोबलकृतम्

Palm-leaf. 27 folia. 15½″ × 1½″. 9 lines in a page. Grantha character. Old. Heavily damaged. Bad medium hand. Uninked. Complete. In verse.

Begnis: श्रीरुद्रभाष्यं । हरि: ओम् । श्लोकरूपं ।

चेतोभृंगमहेशपादकमलं यद्विष्णुनेत्रार्चितं
तत्वं मौनिमनोमधुव्रतवरव्राताश्र . . . . ।
. . . . . गण्यपुण्यविभवप्राप्यन्ततो दुस्त्यजं
मा मा सन्त्यज मामको यदि तदा तत्रैव नित्यं वस ॥
संसार . . . . . .
नहोबलमहाकविराजराज: ।
श्रीरुद्रभाष्यतरिमुज्वलपद्यरूपां
चक्रे सदाशिवकृपा . . . . . ॥
. . . . पूजितकालकाल-
श्रीकालकालार्चननीतकाल: ।
श्रीरुद्रभाष्योज्वलचित्तमूलो
जय . . . . . ॥
. . बलो भास्करवंशभानु-
श्रीरुद्रमन्त्रार्थविचारदक्ष: ।
श्रीरुद्रभाष्यं तनुते . . .
: . . . . . भावं ॥
ब्रह्माद्यैरपि रुद्रनाममहिमा न ज्ञायते सर्वधा
रुद्रार्थोपि फणीन्द्रपाणिनिगु . . . . . ।
कस्तत्रप्तिमथापि शंकरकृपासंप्राप्तविद्यस्य मे
नाशक्यं हि तत: करोमि शुभदं श्री . . . . . ॥
. . . . . कुरुपद्यरूपं
विद्या न विद्या यदि ते तदेति ।
संप्रेरितस्सांबसदाशिवेन
श्रीरुद्रभा . . . . . ॥
श्रीरुद्रमन्त्रार्थविचारमात्र-
मन्त्रार्थबोधार्थमहं करोमि ।
अतो मया साधनिकादिकं तथा
न ग्रन्थविस्तारभयेन लिख्यते ॥

Ends:

एवं सर्वमहोबलेन वशिना श्रीरुद्रभाष्यं कृतं
श्रीमत्भास्करव . जेन लळितश्लोकैश्शिवप्रीतये ।
श्रीविश्वे . रदिव्यपादकमलद्वयानप्रणामार्चन-
स्तोत्राराधनचिन्तनादिनिरतस्वान्तेन शुद्धात्मना ॥
व्याख्या श्रीमदहोबलेन रचिता श्रीभास्करीयेण या
श्रीविश्वेशपदारविन्दनिरतस्वान्तादिसन्तोषता ।
व्याख्या कल्पलता मनोज्ञफलदा संशीलतां सादरं
मत्कृत्यन्तु मया कृतं मम विभो: कृत्यन्तु नात:परं ॥

यन्मे मानसमैशपादकमले भक्त्या मयैवार्प्पितं
सर्वस्वं मम एवमेतदितरं नास्त्येति विजानतः ।
त्र्यक्ष . क्षमनाथनाथकरुणासिद्धो प्रसन्नो भव
हन्येनांसि निहन्ति चान्तकभयं हन्त्यापदे वैरिणो ॥
हन्त्यार्तिञ्च तथापकीर्त्तिविकृतिती दैन्यञ्चता दुर्द्धिया
शोभा प्राभववैभवा भव शुभारंभैकभूष्णो प्रभो ।
शंभो शांभवभावभावितभवत्पादारविन्द . .
भवत्पादारविन्दस्मृतिः . . . . . ॥
भो शंभो करुणांबोधे त्वत्पादांबुरुहे मम ।
स्वान्तं संवसतु स्वामिन् मया त्वन्यत्र सर्वधा ॥

Colophon: इति श्रीमत्सकललोकप्रसिद्धश्रीमद्वास्करवंशरत्नसंभूतश्रीमन्नृसिंहभट्टमहोपाद्धयायहृदयानन्द - सुधाकरकलासंबन्धार्केन रामक्कागर्भसंभूतनप्रणमत्सु - रासुरमौलिदिव्यरत्नकोटीरकोटिप्रभापूरपूरितश्रीविश्वेशदि - व्यचरणारविन्दमकरन्दसन्दोहान्दोळितदिव्याञ्चितचञ्च - रीकेणाहोबलेन विरचितं श्लोकरूपं श्रीरुद्रभाष्यं संपूर्णं ॥ श्रीगुरुभ्यो नमः ॥ देवी रक्षतु मां सदा ॥

महेश त्वद्वारि स्फुरतु रुचिरा वाग्गतितरां
ममैषा निर्दोषा जय जय महेशेति सततं ।
शिवा सैषा वाणी भवतु शिवदं मह्यमनिशं
महेशं नाथं मां शरणद सुनाथं कुरु विभो ॥

हरिः ओम् । शुभमस्तु ॥
प्लवंगवर्षे कर्क्किस्थे रवौ वेंकटसूरिणा ।

The author refers to his another work named Nyāyamahāmaṇi (fol. 3*a*).

203. 9. E. 131.

THE RUDRAPRAS'NAVṚTTIVYĀKHYĀ—ANONYMOUS

रुद्रप्रश्नवृत्तिव्याख्या—अज्ञातकर्तृका

Paper. 75 folia. 11¼" × 5". 10 lines in a page. Devanāgarī script. Recent. In excellent order. Well written in a bold medium hand.

A commentary on Nīlakaṇṭha's commentary on the Rudrapras'na. Fairly elaborate. Author's name does not appear. Apparently incomplete, breaking off in the 10th Anuvāka. Verses from the text, *viz.* Nīlakaṇṭha's Vṛtti are cited. Contains references to Mādhava, Ahobala and Bhaṭṭabhāskara (fol. 3*a*).

Begins: श्रीगणेशाय नमः । ॐ नमः शिवाय । ओन्नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंश-ऋषिभ्यो नमो गुरुभ्यः ।

अष्टाविंशं गुरुं वंदे सप्तविंशो यदीक्षितः ।
तीर्त्वा षोडश सप्त त्रीनश्नुते नव विंशताम् ॥
श्रीरुद्रोपनिषद्वृत्तिः पद्यैराद्यैरकारि या ।
गंभीरां तां व्याकरोमि विस्पष्टश्रुतियुक्तिभिः ॥
शतकृत्वो वदेत्पथ्यमिति वृद्धानुशासनात् ।
ग्रंथे ऽस्मिन्बालबोधार्थे पुनरुक्तिरक्तिरदूषणं ॥

तत्र भवान् श्रीनीलकंठनामा महायोगी प्रारिप्सि-ताया: श्रीरुद्रोपनिषद्वृत्तेर्निष्प्रत्यूहपरिपूरणाय प्रचय-चकृतं गुर्विष्टदेवतानुसंधानरूपं मंगलं शिष्यशिक्षायै निबध्नप्रेक्षावत्प्रवृत्यंगमभिधेयादि दर्शयितुं चिकीर्षितं सूचयति द्वाभ्यां । तत्रादाविष्टदेवतां भावयन् रुद्राध्याय-स्योपनिषत्वं प्रतिपादयंश्चमकानुकानुवाकैरेकवाक्यतां दर्शयति—

चतुस्त्रिंशत्वारिंशाद्गणतविभूते शिवतम
त्वमेवार्के भर्गो भुवि दश दिगीशस्त्वमिति ते ।
महारुद्र व्यूहत्रयमरुमुपासेनति मखै-
र्वशीकर्तुं काक्षै चमकपठितं भूतिविभवं ॥

अत्र श्रीरुद्राध्याये बहुवचनांतनामोपेता गणरुद्रप्रति-पादका मंत्राः । एकवचनांतनामोपेता द्व्यूनशतं मंत्रा

विभूतिरुद्रप्रतिपादकाः। तेषु हरिकेशोभ्यो नमस्तारायेत्यत्र हरिश्च कश्च ईशश्चेति क्रमादकारोकारमकारार्थाः। कृत्स्नप्रणवार्थस्तु तारस्तुर्यमूर्तिः। तत्र पूर्वे शंभुशंकरशिवाः। तारस्तु मयोभुर्मयस्करः शिवतरश्च। त एवं घयोर्वृद्धया शतं विभूतिरुद्रा भवंति। शेषाः प्रथमदशमानुवाकस्थास्सप्तविंशतिर्मंत्रा महारुद्रपराः। तस्य मुख्यं रूपं शिवतमं। तत्र मीढुष्टमशिवतमेत्यत्र तत्पदार्थलक्ष्यस्य शिवतमत्वमुक्तं। या त इषुः शिवतमेत्यत्र त्वंपदार्थलक्ष्यस्य। द्वयोः शिवतमयोरसंभवातयोरैक्यं। वक्ष्यति विशलो बाणवाढः। उतेति। अत्र बाणवान् रुद्रः। तस्या अग्निरनीकमासीत्सोमः शल्यं विष्णुस्तेजनं वरुणः। पर्णानीति चतुरवयवां रौद्रीमिषुमामनंति। तत्र पतनधर्मित्वाद्वरुणशब्देनाब्बहुलं स्थूलं शरीरं गृह्यते। अग्निस्तैजसं लिंगशरीरं। सोमः शांतप्रकाशमयत्वादस्मितामात्रं धीसत्वं विष्णुश्चिन्मात्रं। स एव सशल्यो जीवः। विशल्यः परमात्मा। तदेतत्तुरीयं चतुश्चत्वारिंशदित्या . मंतत्रयेण दर्शितं।

The Rudra is divided into three Kāṇḍas:

कांडत्रयात्मकस्य रुद्राध्यायस्य प्रथमः पंचदशर्चश्चकांडो व्याख्यातः। हिरण्यवर्णादिद्द्वितीयो यजुःकांडः किरिकादिस्तृतीयो मिश्रकांडश्च व्याख्यातव्यौ। तत्राद्ये अध्यारोपापवादौ संक्षिप्योक्तौ। साधनकलापस्तु प्राधान्येन निरूपितः। द्वितीये त्वध्यारोपो विस्तरेण दर्शितः। अपवादसाधने संक्षिप्योक्ते। तृतीयस्त्वपवादपुरस्कारेणैव प्रवृत्तः (fol. 48*b*)

The commentary contains the following statement with regard to Khilas.

नमो रुद्रायाततायिने क्षेत्राणां पतये नम इत्यस्यानंतरं षट् खिलयजूंष्यान्नायंते। तत्रेदं प्रथमं। नम इंद्र जटाकलापिनां पतये नम इति। खिलं नाम शाखांतरीयमेपेक्षावशात्स्वशाखायां यत्पठ्यते तदुच्यते। यथा ऽर्वाचमिंद्र इति मंत्रः तैत्तिरीयकैः पठ्यमान एव बव संहितायां खिलत्वेन व्यहीयते (fol. 56*b*)

Ends: भोषजीति। सर्वस्मिन्नहनि संसाररोगहर्त्री। निरतिशयत्वात्कालकृतोप्यतिशयो स्यांत संभवतीत्यर्थः। एवमपि विश्वप्रकाशकोपि सूर्यो नक्तंचरान्नानुगृह्णाति। एवमियमपि पापिष्टान्नानुगृह्णीयादित्यत आह—शिवेति। खलानपि सुखयतीत्यर्थः। सूर्यो हि त्रिगुणात्मत्वान्न सर्वसमः। इयं तु शांतप्रकाशरूपत्वात्सुधांशुवत्सर्वसुखकरीत्यर्थः। अत्रैव हेतुमाह—रुद्रस्य भेषजीति। भिषक्तमं त्वा भिषजां शृणोमीति। रुद्रस्य निरतिशयभिषक्त्वं श्रूयते। तेन यथा सद्वैद्यप्रयुक्तं दिव्योषधं कुष्ठक्लैब्यादीन् कर्मजानपि आजानपि आजानसिद्धान् रोगान् समूलमुन्मूलयति। एवमियं भिषक्तमेन प्रयुक्ता काशीदिव्यौषधवत् रजस्तमः प्रकृतीनपि जंतून्संसाररोगान्मोचयत्येवेत्यर्थः। तया नो मडजीवसे इत्यनेन काश्यामेवास्माकं जीवनं भवतु। न तु जीवनार्थं तद्वियोगोस्माकं भवत्वित्यर्थः। २।

तया नो में इत्यने जीवसे इत्येतदेव मंत्रांतरैर्विवृणोतीत्याह—

तया तन्वानोस्मान्मृड मृडयताजीवयितुमि-
त्यसावस्यां वस्तुं स्वतनुभरणाय स्पृहयति।
तदर्थं मंत्राणां विदधति चतुर्णामिह जयं
परे गूढं वासं कति वन चतुर्थाश्रम मपि॥

अत्र पूर्वार्द्धिनमंत्रांत्यपाद इत्थं व्याख्यातः। तत्र तयेति तृतीयाफलरूपे हेतौ। जीवसे इति व्यंताजीवयते स्तुमर्थे असेप्रत्ययः। तथाच अविमुक्ताख्यारुद्रतनुप्राप्तिफलं जीवनं संपादयितुः पशुपुत्रादियुक्तानस्मानन्नवसनारोग्यादिना सुखयेत्यर्थः। दुःवनेन जीवन् हि काश्यां न स्थातुं शक्नोतीति तनूप्राप्तिरूपं फलं विहिदतं भवतीति भावः। तदर्थं निर्विघ्नकाशीवासार्थं इमां रुद्रायेत्यादीनां चतुर्णां मंत्राणां इहास्मिन् ग्रंथे जयं विदधति। तत्तदध्वर्यु-

शाखिन इति शेषः। अन्ये तु संवर्तमैत्रेयादयः निगूढमेव काशीवासं विदधति। तादृशाचारप्रदर्शनेन संवर्तस्यापिति गूढमेव काश्यां वसतः विघ्नितः काशीवासो भवदिति आश्वमेधिके पर्वणि महाभारते संवर्तमरुतीयोपाख्याने स्पष्टं दृश्यते इति जाबालाः। सर्वविघ्नविनाशार्थं चतुर्थाश्रममेवाविमुक्तसेविना मनंतीत्याक्षरादेवावगंतव्यं॥

204. 3. G. 11.

THE TAITTIRĪYABRĀHMAṆA

तैत्तिरीयब्राह्मणम्

Paper. 278 folia (3 Vols.). 10″ × 4″. 9—11 lines in a page. Devanāgarī script. Fairly old. Slightly worn and moth-eaten. Accented in parts.

Vol. 1: 75 folia; Kāṇḍa (Aṣṭaka) 1.

At the end:

संवत् १७७३ प्लवंगनामसंवत्सरे उदगयने माघे मासि शुक्लपक्षे प्रतिपदा तिथौ भौमवासरे इदं पुस्तकं आत्मारामेण लिखितं विष्णुभट्टद्रोणस्य।

Vol. 2: 88 folia; Kāṇḍa 2.

Date: Same as that of Vol. 1; the names of the scribe and former owner omitted.

Vol. 3: 155 folia; Kāṇḍa 3; Kāṭhaka included.

At the end:

दशकसंख्या॥ ७९२॥ संवत् १८५९ मिती कार्तिकवदि १० भौमवा।

The same scribe and former owner are mentioned on fol. 1*a*.

All the three volumes are in the same hand. Each volume is foliated separately. The Kāṇḍas are designated as Aṣṭakas in the colophons.

205. 8. J. 54.

Paper. 30 folia. 8″ × 3¼″ 9 lines in a page. Grantha script. Bound in book form. Old, fragile, discoloured and injured. Blurred dirty medium handwriting. Accented.

From Anuvāka 3. 4. 12 to the end of Praśna 3. 6.

206. 9. C. 69.

Paper. 10 folia. 8″ × 4″. 6—12 lines in a page. Grantha script. Bound in book form. Old and fragile. In the same hand as the last. Accented.

Anuvākas 3. 1. 1—3.

207. 22. L. 44.

Palm-leaf. 84 folia. 17″ × 1¼″. 6—9 lines in a page. Grantha script. Old. Damaged. Well written in two different medium hands. Inked. Unaccented.

Kāṇḍa 3 without Kāṭhaka.

Praśnas 1—6 foliated consecutively and each of the rest separately.

208. 9. D. 58.

Paper. 137 folia. 8″ × 3¾″. 7—8 lines in a page. Devanāgarī script. Bound in book form. Old. Worm-eaten; foll. 1—9, 75—94, 98, 99, 113, 114 and 124 missing. Beautifully written in a large bold hand. Accented.

Prasnas 1—4 and 7—9 of Kāṇḍa 3.

Prasnas 5 and 6 lost in missing leaves (75—94).

209. 22. A. 41.

Palm-leaf. 26 folia. 18½″ × 1″. 5 lines in a page. Grantha script. Old. Slightly worm-eaten. Good medium writing. Inked. Unaccented.

Prasna 3. 7 complete.

210. 22. D. 9.

Palm-leaf. 30 folia. 16″ × 1½″. 5—6 lines in a page. Grantha script. Old. Damaged; foll. 15, 16, 17 and 31 missing. Fair large writing. Uninked. Unaccented.

Prasna 3. 8 together with Anuvākas 3. 9. 1—15.

211. 22. L. 32.

Palm-leaf. 130 folia. 16½″ × 1¼″. 4—5 lines in a page. Grantha script. Old. In a fairly good condition. Good medium writing. Uninked except Prasna 3. 1. Unaccented except a few folia.

Kāṇḍa 3 from the beginning up to the middle of the 11th Anuvāka of the 8th Prasna.

The inked part is foliated separately.

212. 22. L. 23.

